**अथवा**

# PS/UM-I/6/97/19

## षष्ठपत्रम्

## साहित्यम्

**समय: घण्टात्रयम्** **पूर्णाङ्का: 100**

**अ. सर्वे प्रश्ना: समाधेया:।** **(20×2=40)**

1. ब्रह्माच्युतार्चित: क:?
2. पव्येक: कीदृश:?
3. वृत्तरत्नाकर: केन विरचित:?
4. लौकिकं छन्द: केन विभागेन द्विधा भवति?
5. वृत्तरत्नाकरग्रन्थस्य प्रमाणं कियत्?
6. कै: अक्षरै: समस्तं वाङ्मयं व्याप्तम्?
7. आर्यादिषु के के चतुर्मात्रागणा: भवन्ति?
8. श्लोकस्य चतुर्थ: अंश: क:?
9. किं नाम समं वृत्तम्?
10. कति छन्दांसि वर्तन्ते?
11. आर्याया: पूर्वार्धे षष्ठ: गण: क:?
12. उपजातिवृत्तस्य किं लक्षणम्?
13. प्रतिपादं जतजा: पुन: गुरुद्वयं भवन्ति चेत् तस्य वृत्तस्य नाम किम्?

Scanned by CamScanner

14. किं लक्षणं विद्युन्मालायाः ?

15. प्रमाणिकावृत्तस्य उदाहरणं लिखत।

**अथवा**

स-स-स-स इति गणाः कस्मिन् वृत्ते भवन्ति ?

16. वंशस्थवृत्ते प्रतिपादं के गणाः भवन्ति ?

**अथवा**

'तरणिजापुलिने नववल्लवी' - अत्र गणविभागं कृत्वा वृत्तस्य नाम लिखत।

17. उक्ता..............तभजाजगौ गः। रिक्तस्थानं पूरयत।

**अथवा**

भुजङ्गप्रयातस्य किं लक्षणम् ?

18. त्रिष्टुप्-छन्दसि प्रतिपादं कति वर्णाः भवन्ति ?

**अथवा**

प्रहर्षिणिवृत्तं कस्मिन् छन्दसि जायते ?

19. 'दोधकमर्थविरोधकमुग्रम्' - अत्र गणान् लक्षयत।

**अथवा**

स्रग्धरावृत्तस्य लक्षणं लिखत।

20. शार्दूलविक्रीडितस्य उदाहरणं सूचयत।



Scanned by CamScanner

ब. सर्वे प्रश्नाः समाधेयाः। (5×8=40)

21. गुरुलघुलक्षणं सोदाहरणं प्रतिपादयत।

**अथवा**

विद्युन्मालायाः लक्षणं विलिख्य सोदाहरणं विशदयत।

22. वृत्तरत्नाकरस्य मङ्गलश्लोकं विवेचयत।

23. गणलक्षणं सोदाहरणं स्पष्टयत।

**अथवा**

आर्यायाः लक्षणं सोदाहरणं लिखत।

24. 'नानाऽऽश्लेषप्रकरणचणाचारुवर्णोज्वलाङ्गी' - अत्र गणान् लक्षयित्वा वृत्तस्य नाम लक्षणञ्च लिखत।

**अथवा**

छन्दांसि कति सन्ति? तेषां नामानि सूचयत।

25. पुष्पिताग्रावृत्तं सलक्षणं सोदाहरणं च स्पष्टयत।

स. निबन्धात्मकः प्रश्नः समाधेयः। (1×20=20)

26. मालिनीमन्दाक्रान्तयोः लक्षणं विलिख्य सोदाहरणं समन्वयं कुरुत।

**अथवा**

आर्यायाः प्रभेदान् सोदाहरणं स्पष्टयत।

**अथवा**

वृत्तरत्नाकरे प्रतिपादितान् विषयान् सविस्तरं विशदयत।



Scanned by CamScanner